रोल नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 8

**028** **228 (HRF)**

# 2026

# संस्कृतम्

**अवधि : होरात्रयम्]** **[ पूर्णांक : 80**

**निर्देश** : (i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।

(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन्नेव स्थाने लेखनीयानि।

(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।

(v) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(vi) खण्डसंख्या अपि लेखनीया।

**खण्ड - 'क' (अपठित-अवबोधनम्)**

1. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

संसारे जनानां विविधानि रूपाणि दृश्यन्ते। केचन सन्ति महापुरूषाः। ते स्वार्थं परित्यज्य परोपकारं कुर्वन्ति। सामान्याः जनाः स्वहितम् अपि पश्यन्ति परहितम् अपि चिन्तयन्ति। केचन राक्षसाः स्वार्थसाधनाय सर्वेषाम् अहितम् एव कुर्वन्ति परन्तु केचन तु परमाधमाः ये स्वार्थं विनैव सर्वेषां हानिं कुर्वन्ति। तेषां कृते वस्तुतः कोऽपि शब्दः नास्ति। शतकत्रयस्य रचयिता भर्तृहरि महोदयेन अपि कथितम् - ते के न जानीमहे।

(क) एकपदेन उत्तरत – 1×2=2

(i) संसारे केषां विविधानि रूपाणि दृश्यन्ते?

(ii) के स्वार्थं विनैव सर्वेषां हानिं कुर्वन्ति?

(ख) पूर्णवाक्येन उत्तरत - 1

(i) सामान्यजनाः कीदृशाः भवन्ति?

(ग) निर्देशानुसारम् उत्तरत - 1×2=2

(i) 'स्वार्थम्' इति पदस्य विपरीतार्थक पदं लिखत?

(ii) 'केचन राक्षसाः' अत्र विशेष्य पदं लिखत?

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत –

एकदा महात्मा गान्धि महोदयः लेखनकार्ये व्यस्तः आसीत्। लेखन्यां मसिः समाप्ता जाता। सः तां लेखनीं स्थापयित्वा अन्यत्र अगच्छत् । पुनः तत्र आगत्य लेखनीम् अपश्यत्। पार्श्वे स्थितः आश्रमवासी अवदत् - बापू! लेखन्यां मसिः न आसीत्, अतएव मया बहिः प्रक्षिप्ता। बापू अवदत् - किमपि वस्तु क्षुद्रं मूल्यरहितं च न भवति। अस्माकं देशः धनस्य अपव्ययं कर्तुं न शक्नोति। शीघ्रं गच्छ तामेव लेखनीम् आनय च। मसिं पूरयित्वा तया लेखन्या एव लेखनकार्यं करिष्यामि।

(क) एकपदेन उत्तरत- 1×2=2

(i) कस्य लेखन्यां मसिः समाप्ता जाता?

(ii) अस्माकं देशः किं कर्तुं न शक्नोति?

(ख) पूर्णवाक्येन उत्तरत - 1×2=2

(i) आश्रमवासी किम् अवदत्?

(ii) गान्धि महोदयः कस्मिन् कार्ये व्यस्तः आसीत्?

(ग) निर्देशानुसारम् उत्तरत - 1×2=2

(i) व्याकरण दृष्ट्या 'अन्यत्र' पदं किम्?

(ii) 'अवदत्' पदे कः लकारः अस्ति?

(घ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 1

**खण्ड - 'ख' (रचनात्मकं कार्यम्)**

3. सुधाकरः दशम कक्षायाः छात्रः अस्ति। सः सद्यः एव क्रिकेट प्रतियोगितां विजित्य आगतः। सः स्वानुभवं वर्णयन् पितरं पत्रं लिखति। तस्य पत्रस्य रिक्तस्थानानि मञ्जूषायां प्रदत्तैः उचित शब्दैः पूरयित्वा उत्तर पुस्तिकायां पुनः लिखत- 1×4=4

| **मञ्जूषा** - महान्तम्, प्रणामाः, समर्पयामि, समायोजिता |
|---|

नैनीताल छात्रावासतः

दि. 24-10-2025

आदरणीयाः पितृचरणाः,

सादरं --------------।

भवताम् आशिषेण अहं स्वस्थोऽस्मि। मया विगत सप्ताहे विद्यालये ------- क्रिकेट प्रतियोगिता विजिता। अतएव --------- सुखम् अनुभवामि।

मातृचरणयोः प्रणामाञ्जलिः -------------।

भवताम् पुत्रः

सुधाकरः

दशम कक्षा

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नाङ्कितं संवादं पूरयित्वा लिखत – 1×4=4

| **मञ्जूषा** - शैक्षिक भ्रमणाय, अगच्छः, वेधशालायाम्, मम |
|---|

वर्णिका - सखि! ह्यः त्वं कुत्र -------------।

सूनृता - अहं ---------- अगच्छम् ।

वर्णिका - -------- शैक्षिक भ्रमणं अपि शीघ्रं भविष्यति।

सूनृता - सखि! कुत्र गमिष्यति?

वर्णिका - नैनीताल नगरे ----------।

5. 'साक्षरता दिवसः' इति विषयम् अधिकृत्य मञ्जूषातः शब्द चयनं कृत्वा चत्वारि वाक्यानि उत्तरपुस्तिकायां लिखत - 2×4=8

| **मञ्जूषा** – अस्माकं देशे, सितम्बर मासे, जीवनं कठिनम्, अक्षरज्ञानं विना, ग्रामीण क्षेत्रे, अद्यापि, वृद्ध जनानां कृते. विविध शैक्षिक केन्द्राणि |
|---|

**खण्ड - 'ग' (अनुप्रयुक्त व्याकरणम्)**

6. अधोलिखितेषु रेखाङ्कितपदेषु सन्धिं / सन्धिविच्छेदं प्रदत्त विकल्पेभ्यः उचितं विकल्पं चित्वा लिखत- 1×3=3

(क) सर्वत्र जलोपप्लवः सञ्जातः।

(i) जल+उप्लवः (ii) जल+उपप्लवः

(iii) जल+प्लवः (iv) जलो+उपप्लवः

(ख) भवन्तः सर्वे+अपि शफरीवत्।

(i) सर्वेऽपि (ii) सर्वोऽपि

(iii) सर्वापि (iv) सर्वेपि

(ग) अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे।

(i) चौर+अभियोगे (ii) चोर+अभियोगे

(iii) चौर्य+भियोगे (iv) चौर्य+अभियोगे

7. अधोलिखितेषु रेखाङ्कितपदेषु समासं/समास विग्रहं प्रदत्त विकल्पेभ्यः उचितं विकल्पं चित्वा लिखत- 1×3=3

(क) प्रत्युत्पन्नमतिः सा जम्बुकमाक्षिपन्ती उवाच।

(i) प्रत्युत्पन्ना च मतिश्च (ii) प्रत्युत्पन्नया मतिः

(iii) प्रत्युत्पन्ना मतिः यस्याःसा (iv) प्रत्युत्पन्नाच असौ मतिः

(ख) तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः अभूत्।

(i) छात्रस्य आवासे (ii) छात्राणाम् आवासे

(iii) छात्रेषु आवासे (iv) छात्रैः आवासे

(ग) त्रिफला चूर्णं स्वास्थ्यकरं भवति।

(i) त्रिफलानां समूहः (ii) त्रीणि च असौ फलानि

(iii) त्रीणि फलानि यस्मिन् (iv) त्रयाणां फलानां संमाहारः

8. अधोलिखितेषु रेखाङ्कित पदेषु प्रकृति-प्रत्ययौ संयोज्य प्रदत्तविकल्पेभ्यः चित्वा शुद्धं विकल्पं लिखत- 1×3=3

(क) ब्रह्मचर्य आश्रमे अध्ययनस्य महत्+त्व भवति।

(i) महानता (ii) महत्ता

(iii) महत्वम् (iv) महनीयता

(ख) बालिकया गीता पठ्+तव्यत्।

(i) पठितव्यम् (ii) पठितव्या

(iii) पठितव्यानि (iv) पठनीया

(ग) वेद+ठक् साहित्यं सर्वाधिकं प्राचीनम् अस्ति।

(i) वेदिक (ii) विदित्वा

(iii) वैदिक (iv) वैदिकी

9. मञ्जूषायाः सहायतया निम्नलिखितानि वाक्यानि अव्ययपदैः पूरयित्वा लिखत- 1×3=3

(क) --------- राष्ट्रीय बालिका दिवसः आसीत्।

(ख) मूढ़ाः -------- प्रलपन्ति।

(ग) क्षेत्रेषु पशवः -------- भ्रमन्ति।

| **मञ्जूषा –** इतस्ततः, ह्यः, उच्चैः |
|---|

10. अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत- 1×3=3


(क) बालकः गृहं गच्छति।

(ख) तेन जलं पीयते।

(ग) लता गीतं गायति।


11. घटिकां दृष्ट्वा संस्कृत पदेषु समयं पूरयित्वा वाक्यानि उत्तरपुस्तिकायां लिखत- 1×4=4

(क)




प्रातः 5:00

(ख)




प्रातः 7:45

(ग)



पूर्वाह्ने 10:15

(घ)



अपराह्ने 1:30

(क) रविवासरे प्रवीणः प्रातः ---------- वादने उत्तिष्ठति।

(ख) प्रातः ---------- वादने स्नानं करोति।

(ग) पूर्वाह्ने --------- वादने जलपानं करोति।

(घ) अपराह्ने --------- वादने भोजनं करोति।

12. अधोलिखितयोः वाक्ययोः अङ्कानां स्थाने संस्कृतस्य संख्यावाचक विशेषणेन रिक्तस्थानपूर्तिः कृत्वा उत्तरपुस्तिकायां लिखत – 1×2=2

(क) विद्यालयस्य उद्याने (19) ---------- वृक्षाः सन्ति।

(ख) (80) ----------- शब्दानाम् निबन्धः लेखनीयः।

13. अधोलिखितेषु वाक्येषु रेखांकितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यम् उत्तरपुस्तिकायां लिखत– 1×3=3

(क) अयं मम शोभनम् उद्यानम्।

(ख) यूयं स्वं कार्यं कुरु।

(ग) छात्रः शिक्षकस्य अनुकरणं कुर्वन्ति।

## खण्ड - 'घ' (पठित अवबोधनम्)

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरत -

वनस्य समीपे एव एका नदी वहति। एक सिंहः सुखेन विश्राम्यति, तदैव एकः वानरः आगत्य तस्य पुच्छं धुनाति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढ़ः। तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्ण-माकृष्य पुनः वृक्षोपरि आरोहति। एवमेव वानराः वारं वारं सिंहं तुदन्ति। क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति।

(क) एकपदेन उत्तरत– 1

(i) वानरः आगत्य किं करोति?

(ख) पूर्णवाक्येन उत्तरत– 1×2=2

(i) वनस्य समीपे का वहति?

(ii) क्रुद्धः सिंह किं करोति?

(ग) निर्देशानुसारम् उत्तरत– 1×2=2

(i) 'विश्राम्यति' इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'क्रुद्धः सिंहः' अत्र विशेष्यपदं किम्?

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत–

क्रोधो हि शत्रुः प्रथमो नराणां,
देहस्थितो देहविनाशनाय।
यथास्थितः काष्ठगतो हि वह्निः
स एव वह्निर्दहते शरीरम् ।।

(क) एकपदेन उत्तरत- 1

(i) नराणां प्रथमः शत्रुः कः भवति?

(ख) पूर्णवाक्येन उत्तरत- 1×2=2

(i) कः शरीरं दहते?

(ii) क्रोधः कीदृशः भवति?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) शरीरस्य पर्यायपदं लिखत?

(ii) 'स्थितः' पदे कः प्रत्ययः?

16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत -

रामः – एष भवतोः सौन्दर्यावलोकजनि तेन कौतूहलेन पृच्छामि-क्षत्रियकुलपिताहयोः सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्ता?

लवः – भगवान् सहस्रदीधितिः

रामः – कथमस्मत्समानाभिजनौ संवृत्तौ?

विदूषकः – किं द्वयोरप्येकमेव प्रतिवचनम्?

लवः – भ्रातरावावां सोदर्यो?

रामः – समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।

लवः – आवां यमलौ।

रामः – सम्प्रति युज्यते। किं नामधेयम्?

(क) एकपदेन उत्तरत- 1

(i) को वा भवतोर्वंशस्य कर्त्ता? इति कः पृच्छति?

(ख) पूर्णवाक्येन उत्तरत- 1×2=2

(i) भगवान् सहस्रदीधितिः कस्य वंशस्य कर्ता?

(ii) कयोः समरूपः शरीरसन्निवेशः?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) 'भ्रातरावावाम्' इति पदे सन्धिविच्छेदं कुरुत?

(ii) 'सम्प्रति युज्यते' अत्र अव्यय पदं किम्?

17. अधोलिखितयोः श्लोकयोः भावार्थं उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत -

(क) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।। ½×4=2

**भावार्थः –**

मानवानां शरीरे ......... महान् ...... अस्ति।

--------- सदृशं कोऽपि बन्धुः नास्ति। येन सः सदा ------- भवति।

(ख) वायुमण्डलं भृशं दूषितं नहि निर्मलं जलम् ।

कुत्सित वस्तुमिश्रितं भक्ष्यं समलं धरातलम् ।। ½×4=2

**भावार्थः –**

साम्प्रतिके काले वायुमण्डलम् अतीव --------- अस्ति।

शुद्धं ------- अपि नास्ति। खाद्यपदार्थाः -------- सन्ति।

------- अपि मलिनम् अस्ति।

18. अधोलिखितयोः श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत-

(क) यो न रक्षति वित्रस्तान् पीड्यमाना परैः सदा।

जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः।। ½×2=1

**अन्वयः –**

यः सदा परैः पीड्यमाना --------- जन्तून् न रक्षति।

सः --------- कृतान्तः। (अत्र) न संशयः।

(ख) वाक्पटुधैर्यवान् मन्त्री सभायामप्यकातरः।

स केनापि प्रकारेण परैर्न परिभूयते।। ½×2=1

**अन्वयः –**

(यः) सभायाम् अपि -------- धैर्यवान्, अकातरः

मन्त्री (अस्ति)। सः --------- परैः न परिभूयते।

19. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तरपुस्तिकायां लिखत – ½×4=2

(क) प्रकृतिः <u>युष्माकं सर्वेषां</u> जननी।

(ख) <u>सः ऋषभः</u> हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात।

(ग) <u>व्याघ्रं</u> दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती।

(घ) <u>लतातरुगुल्माः</u> प्रस्तरतले पिष्टाः न भवन्तु।

20. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोज्य पुनः उत्तरपुस्तिकायां लिखत- ½×6=3

(i) बहुभूमानि भवनानि क्षणेनैव धराशायीनि जातानिः। उत्खाता विद्युद्दीपस्तम्भाः।

(ii) वस्तुतः शान्तानि एव पञ्चतत्वानि क्षिति जल पावक समीर गगनानि भूतलस्य योगक्षेमाभ्यां कल्पन्ते।

(iii) गणतन्त्रदिवसपर्वणि यदा समग्रमपि भारतराष्ट्रं नृत्यगीतवादित्राणाम् उल्लासे मग्नमासीत्।

(iv) पञ्चोत्तर द्विसहस्रतमे रव्रीष्टाब्दे अपि कश्मीर प्रान्ते पाकिस्तान देशे च धरायाः महत्कम्पनं जातम्।

(v) अशान्तानि खलु तान्येव महाविनाशम् उपास्थास्यन्ति।

(vi) भूकम्पस्य दारुणविभीषिका समस्तमपि गुर्जरक्षेत्रं विशेषेण च कच्छजनपदं ध्वंसावशेषेषु परिवर्तितवती।

21. निम्नाङ्कित शब्दार्थानां सुमेलनं कुरुत- ½×4=2

| **शब्दः** | **अर्थः** |
|---|---|
| भृशम् | इन्द्रः |
| अम्भोदः | गर्दभः |
| वासवः | अत्यधिकम् |
| खरः | मेघः |

*****